|| તૃતીયોऽધ્યાયઃ ||

શુભેન કર્મણા સ્વર્ગં નિરયં ચ વિકર્મણા |
મિથ્યાજ્ઞાનેન ચ તમો જ્ઞાનેનૈવ પરં પદમ || ૧ ||

યાતિ તસ્માદ્વિરક્તઃ સન જ્ઞાનમેવ સમાશ્રયેત |
સર્વાવસ્થાપ્રેરકશ્ચ સર્વરૂપેષ્વભેદવાન || ૨ ||

સર્વદેશેષુ કાલેષુ સ એકઃ પરમેશ્વરઃ |
તદ્ભક્તિતારતમ્યેન તારતમ્યં વિમુક્તિગમ || ૩ ||

સચ્ચિદાનંદ આત્મેતિ માનુષૈસ્તુ સુરેશ્વરૈઃ |
યથાક્રમં બહુગુણૈર્બ્રહ્મણા ત્વખિલૈર્ગુણૈઃ || ૪ ||

ઉપાસ્યઃ સર્વવેદૈશ્ચ સર્વૈરપિ યથાબલમ |
જ્ઞેયો વિષ્ણુર્વિશેષસ્તુ જ્ઞાને સ્યાદુત્તરોત્તરમ || ૫ ||

સર્વેऽપિ પુરુષાર્થાઃ સ્યુર્જ્ઞાનાદેવ ન સંશયઃ |
ન લિપ્યતે જ્ઞાનવાંશ્ચ સર્વદોષૈરપિ ક્વચિત || ૬ ||

ગુણદોષૈઃ સુખસ્યાપિ વૃદ્ધિહ્રાસૌ વિમુક્તિગૌ |
નૃણાં સુરાણાં મુક્તૌ તુ સુખં ક્લૃપ્તં યથાક્રમમ || ૭ ||

|| ઇતિ શ્રીમદાનંદતીર્થભગવત્પાદાચાર્યવિરચિત બ્રહ્મસૂત્રાણુભાષ્યે તૃતીયોऽધ્યાયઃ ||

www.yousigma.com